5

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 530

Title Sanyāsa prayoga

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 530 Subject: Dharma Śāstra

Title: Sanyāsa prayoga.

Author: Rudradeva. Scribe: Mādhavānanda

Date of the work: — Date of the Ms.: V.S. १८५४

Place of the work: — Place of the Ms.: Aśvanikmān

Size: 9.5" by 4.2" Extent: 29 to 52 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

तोयमात्रः शिखानष्टस्यनुवाके नाभिमंत्र्य पुत्रैषणा वित्तैषणा लोकैषणा मया त्यक्ता स्वाहेत्युदकं दत्त्वा नादाय पि ति१
बेत्॥ अभयं सर्वभूतेभ्यो मत्तः स्वाहेति द्वितीयं पिबेत्॥ संन्यस्तं मया स्वाहेति त्रिः शेषं पात्रस्थमुदकं दत्त्वा
नादाय पिबेत्॥ ततो गायत्रीं व्याहृतौ प्रणवे प्रवेशयेत्॥ ततो गायत्रीं व्याहृतौ प्रवेशयेत् व्याहृतीः प्रणवे प्र
वेशयेत्॥ ततो न्यत्यवित्रं जयमंजलीं दर्भमादाय प्राच्यां दिशि दक्षिणस्यां प्रतीच्यामुदीच्याम् ऊर्ध्वायां च दिशि
तस्यां प्रत्येकं निनयेत्॥ ततः सूर्याभिमुख ऊर्ध्वबाहुः प्रैषमुच्चारयेत्॥ ॐ भूः संन्यस्तं मया॥ ॐ भुवः
संन्यस्तं मया॥ ॐ स्वः संन्यस्तं मया॥ इत्युपांशु मध्यमोच्चैःस्वरेण त्रिर्ब्रूयात्॥ ततोऽभयं सर्वभूतेभ्यो
मत्तः स्वाहेति प्राच्यां दिश्युदकांजलिं निनयेत्॥ ततस्तु इमां शिखां निकृत्य विसृज्य यज्ञोपवीतं च छित्त्वो
भयमुदकांजलिनासह गृहीत्वा॥ ॐ भूः स्वाहेत्यप्सु जुहुयात्॥ तत ऊर्ध्वं पुत्र गृहं न गच्छेत्॥ अस्यां त
मातुरश्चेत्त्रैषमात्रं वा वदेत्॥ जीवति चेत्स्वस्यः सन्महावाक्योपदेशार्थं सद्गुरुमुपसाद्य महावा

२९ क्योपदेशं लब्ध्वा क्रमसंन्यासविध्युक्ताचारेण वर्त्तयेत्॥ उपदेशं विना तदानीमेव मरणे यतिसंस्का
रविधिनैव संस्कारनारायणबलिपार्वणाराधनादि कुर्यात्॥ इत्यातुरसंन्यासप्रकारः॥ ॥
अत्र स्मृतिवचनानि॥ आतुराणां विशेषोस्ति न विधिर्नैव च क्रिया॥ प्रैषमात्रं तु संन्यासं आतु
राणां विधीयते॥१॥ गत्वोदकसमीपं तु पात्रयोरपउद्धरेत्॥ तयोरेकं करेणापगृहीत्वा दक्षि
णेन वै॥ अप्स्वेव त्वेष इत्यादिमंत्राभ्यां जुहुयात्सुधीः॥२॥ हुत्वाहुतिद्वयं पश्चात्पात्रस्थाहुतिशेषकं॥३॥
आप्सुः शिशानो वृषभो नुवाकेनाभिमंत्रयेत्॥४॥ पुत्रैषणेति मंत्रेण तदुद्धृत्य पिबेज्जलं॥ द्विती
यमन्नयं सर्वैस्येवमुक्त्वा पिबेद्द्विजः॥५॥ ॐ भूर्भुवः स्वरिति पिबेच्छेषं न शोषयेत्॥ आदायां
जलिना तोयमन्यत्प्राग्दिशं क्षिपेत्॥६॥ आदित्याभिमुखो भूत्वा चोर्ध्वबाहुरनंदितः॥ संन्य
स्तोहमिमं मंत्रं त्रिवारमभ्यसेद्बुधः॥७॥ ततः परं गदे बंधुजनग्रहं जिज्ञासुको न वेत्॥ मरने तु ति २९

८
क्षिपेत्कमावुदके वा यथाविधि॥ सोमयाजी भवेत्प्राजापत्यो वैश्वानरी तथा॥ त्रैधातवीयामि
ष्ट्वा सर्ववेदसदक्षिणां॥८॥ यद्यशक्तो भवेदाहवनीये जुहुयाद्बुधः॥ देवतायै प्रधानायै पूर्णाहुतिमनुत्त
मां॥९॥ असौ स्वर्गाय लोकाय स्वाहेति ज्वलयेत्ततः॥ पात्राणां मन्मयानां प्रक्षेपोप्सु विधीयते॥१०॥ अयं नु३
४२ ते योनिरित्याभ्यामात्मन्यग्नीन्समापयेत्॥ तत आतुरसंन्यासं कुर्यादेवं विधानतः॥११॥ उक्त आतुरसंन्या
स आंगिरसोमते॥१२॥ इत्यांगिरसीये आतुरसंन्यासप्रकारः॥ ॥ आषाढपौर्णमास्यां व्यासपूजो
क्ता॥ ॥ तत्र त्रिमुहूर्त्तां चेत्परैव ग्राह्या॥ व्यासपूजां प्रवक्ष्यामि सम्यक्संवित्प्रसिद्धये॥ कृत्वानुष्ठा
नमाषाढ्यां पूजांगं संनिधापयेत्॥१॥ प्राणायाममंत्रयं कृत्वा षडंगन्यासपूर्वकं॥ व्यासपूजां करिष्या
मीत्युक्त्वानुसलिलं स्पृशेत्॥२॥ तत्र प्रयोगः॥ प्रातः कृतनित्यक्रियो गंगादौ तीरं कृत्वा स्नात्वा पूजास्था
नमागत्य गोमयोपलिप्ते भूमौ सर्वतोभद्रं विरच्य तत्पश्चिमदेशे आसनं न्यस्य॥ स्वगुरवश्चेत्यादि देश

३० कालोसंकीर्त्यमासपूजांकरिष्यइतिसंकल्प्य॥प्राणानायम्यासनेदिग्बंधा दिन्यासवस्त्रूप्यादिपुं
गध्यानंचपुरुषस्त्रूक्तेनस्वशरीरेन्यासंकृत्वा॥कलशाराधनंशंखार्चनंविधायशंखोदकेनपू
जाद्रव्यमात्मानंचप्रोक्ष्यसर्वतोभद्रेतंडुलपुंजोपरिदेवतावाहनंकुर्यात्॥यथा॥मध्ये॥ॐब्रह्मणे
नमः॥ब्रह्माणमावाहयामि॥१॥एवमग्रेपि॥उत्तरे॥ॐसोमाय०२॥ईशान्यां॥ॐईशानाय०३॥पू
र्वे॥ॐइंद्राय०४॥आग्नेय्यां॥ॐअग्नये०५॥दक्षिणे॥ॐयमाय०६॥नैरृत्यां॥ॐनिरृतये०७॥प
श्चिमे॥ॐवरुणाय०८॥वायव्यां॥ॐवायवे०९॥वायुसोममध्ये॥ॐअष्टवसुभ्यो०१०॥सोमे
शानमध्ये॥ॐएकाद शरुद्रेभ्यो०११॥ईशानेंद्रमध्ये॥ॐद्वादशादित्येभ्यो०१२॥इंद्राग्निमध्ये॥
ॐअश्विभ्यां०१३॥अग्नियममध्ये॥ॐविश्वेभ्योदेवेभ्यःसपैतृकेभ्यो०१४॥यमनिरृतिमध्ये॥ॐ
सप्तयक्षेभ्यो०१५॥निरृतिवरुणमध्ये॥ॐभूतनागेभ्यो०१६॥वरुणवायुमध्ये॥ॐगंधर्वाप्स ३०

४अपःआवाहयामि॥ १तदुत्तरे १तदुत्तरे

रोभ्यो०१७॥ब्रह्मसोममध्ये॥ॐस्कंदाय०१८॥ॐवृषभाय०॥१९॥ॐशूलमहाकालाभ्यां०२०॥
ब्रह्मेशानमध्ये॥ॐदक्षादिसप्तगणेभ्यो०२१॥ब्रह्मेंद्रमध्ये॥ॐदुर्गायै०२२॥ॐविष्णवे०॥२३॥ब्रह्माग्नि २तत्पूर्वे
मध्ये॥ॐस्वधायै०२४॥ब्रह्मयममध्ये॥ॐमृत्युरोगेभ्यो०२५॥ब्रह्मनिरृतिमध्ये॥ॐगणपतये०२६॥
ब्रह्मवरुणयोर्मध्ये॥ॐअद्भ्यो०२७॥ब्रह्मवायुमध्ये॥ॐमरुद्भ्यो०२८॥ब्रह्मणःपादमूलेकर्णिकाधः॥ ४मरुतःआ०
तत्रैव५ ॐपृथिव्यै०२९॥तत्रैव॥ॐसप्तसागरेभ्यो०३०॥ॐगंगादिसप्तसरिद्भ्यो०३१॥ॐमेरवे०३२॥बाह्य तदुपरि१
कुर्यात्९ परिधौसोमादिसंनिधौक्रमेणायुधावाहनं॥ॐगदायै०३३॥ॐत्रिशूलाय०३४॥ॐवज्राय०३५॥
ॐशक्तये०३६॥ॐदंडाय०३७॥ॐखड्गाय०३८॥ॐपाशाय०३९॥ॐअंकुशाय०४०॥तद्बाह्येउत्त
रादितः॥ॐगौतमाय०४१॥ॐभरद्वाजाय०४२॥ॐविश्वामित्राय०४३॥ॐकश्यपाय०४४॥ॐजम
दग्नये०४५॥ॐवसिष्ठाय०४६॥ॐअत्रये०४७॥ॐअरुंधत्यै०४८॥तद्बहिःपूर्वादिदिक्षु॥ॐऐं

३९ ड्यै० ४९ ॥ ॐ कौमार्यै० ५० ॥ ॐ ब्राह्म्यै० ५१ ॥ ॐ वाराह्यै० ५२ ॥ ॐ चामुंडायै० ५३ ॥ ॐ वैष्णव्यै० ५४ ॥ ॐ
माहेश्वर्यै० ५५ ॥ ॐ वैनायक्यै० ५६ ॥ इति षट्पंचाशद्देवताः सर्वतोभद्रे पूज्याः ॥ ॐ सर्वतोभद्रपी
ठदेवताभ्यो नमः ॥ गंधं स० पुष्पं० धूपं० दीपं० नैवेद्यं० फलं० तांबूलं० दक्षिणां० इति संपूज्य ॥ तत्र
मध्ये मही द्यौरित्यादि कशैले पूर्णपात्रनिधानांते वरुणमावाह्य संपूज्य पूर्णपात्रोपरि वस्त्रे गंधेन द्वा
दशारं लिखेत् ॥ यथा ॥ मध्ये त्रिकोणं ॥ तद्बहिः षट्कोणं ॥ तद्बहिर्वृत्तं तत्कर्णिका ॥ तद्बहिरष्टद
लानि ॥ प्रतिदलाग्रे द्वादशाग्रारान्यवाकारान्कुर्यात् ॥ तद्बहिश्चतुर्द्वारं चतुरस्रं विलिखेत् ॥ त्रिको
णषट्कोणात्मकवृत्तरूपकर्णिकायां लक्ष्मपंचकं ॥ तत्रर्वाघष्टदलेषु अष्टौ पंचकानीति ॥
पुनर्देशकालौ संकीर्त्य शुचि प्रतिपदमारभ्याष्टपदापर्यंतं यावच्चतुरो मासांश्च श्राद्धपित्रं
डजोद्भिजादिबहुप्राणिसंकुलितमार्गे यात्रानिवृत्त्यर्थं श्रीलक्ष्मव्यासाचार्यादीनां संनिधान ३९

सिध्यर्थं निःशाटनाघरिलागमनागमनदोषनिवृत्त्यर्थं व्यासोक्तविधानेन सकलदेवतास्थाप
नपूजाद्यहं करिष्ये ॥ तत्र पीठे द्वादशारे मध्ये कर्णिकायां ॥ ॐ आं आधारशक्त्यै नमः ॥ ॐ कूं कू
र्माय० ॥ ॐ अं अनंताय० ॥ ॐ पं पृथिव्यै० ॥ ॐ क्षीं क्षीरसमुद्राय० ॥ ॐ श्वें श्वेतद्वीपाय० ॥ ॐ मं म
णिमंडपाय० ॥ ॐ कं कल्पवृक्षाय० ॥ ॐ रं रत्नवेदिकायै० ॥ ॐ रं रत्नसिंहासनाय० ॥ ॐ सं सर्वश
क्तिकमलासनाय० ॥ पीठकोणेषु ॥ आग्नेये ॥ ॐ गं गणपतये नमः ॥ गणपतिमावाहयामि ॥ ए
सं १ वं सर्वत्र ॥ नैरृत्ये ॥ ॐ सं सरस्वत्यै० ॥ वायव्ये ॥ ॐ दुं दुर्गायै० ॥ ईशाने ॥ ॐ क्षें क्षेत्रपालाय० ॥ लक्ष्म
पंचकस्याग्नेये ॥ ॐ ब्रं ब्रह्मणे० ॥ ईशान्ये ॥ ॐ रुं रुद्राय० ॥ पीठमध्ये पूर्वमंत्रेण ॥ ॐ कृष्णाय० ॥ मध्ये ७
पूर्वे ॥ ॐ वासुदेवाय० ॥ दक्षिणे ॥ ॐ संकर्षणाय० ॥ पश्चिमे ॥ ॐ प्रद्युम्नाय० ॥ उत्तरे ॥ ॐ अनिरुद्धा
य० ॥ लक्ष्मपंचकस्य दक्षिणे ॥ मध्ये ॥ ॐ वेदव्यासाय० ॥ पूर्वे ॥ ॐ वैशंपायनाय० ॥ दक्षिणे ॥ ॐ सुमं

नवे॰॥पश्चिमे॥ॐ जैमिनये॰॥उत्तरे॥ॐ पैलाय॰॥लक्ष्मपंचकस्योत्तरे॥मध्ये॥ॐ शंकराचार्येभ्यो॰॥
३२ पूर्वे॥ॐ विश्वरूपाचार्येभ्यो॰॥दक्षिणे॥ॐ पद्मपादाचार्येभ्यो॰॥पश्चिमे॥ॐ हस्तामलकाचार्येभ्यो॰॥
उत्तरे॥ॐ त्रोटकाचार्येभ्यो॰॥लक्ष्मपंचकस्य पश्चिमे॥मध्ये॥ॐ सनकाय॰॥पूर्वे॥ॐ सनंदनाय॰॥
दक्षिणे॥ॐ सनातनाय॰॥पश्चिमे॥ॐ सनत्कुमाराय॰॥उत्तरे॥ॐ कपिलाय॰॥लक्ष्मपंचकस्य नै
ॐ५ ऋत्ये॥मध्ये॥ॐ ऋषभाय॰॥पूर्वे॥ॐ दत्तात्रेयाय॰॥दक्षिणे॥ॐ शुकाय॰॥पश्चिमे॥ॐ नारदाय॰॥
उत्तरे॥ॐ संवर्त्ताय॰॥लक्ष्मपंचकस्य वायव्ये॥मध्ये॥ॐ श्वेतकेतवे॰॥पूर्वे॥ॐ दुर्वाससे॰॥दक्षि
णे॥ॐ जडभरताय॰॥पश्चिमे॥ॐ रैवताय॰॥उत्तरे॥ॐ वामदेवाय॰॥लक्ष्मपंचकस्य पूर्वे॥मध्ये॥
ॐ द्राविडाचार्यै॰॥पूर्वे॥ॐ गोविंदभगवत्पूज्यपादाचार्येभ्यो॰॥दक्षिणे॥ॐ गौडपादाचार्येभ्यो॰॥
पश्चिमे॥ॐ विवरणाचार्येभ्यो॰॥उत्तरे॥ॐ समस्तविद्याप्रवर्तकाचार्येभ्यो॰॥लक्ष्मपंचकस्याग्नेये॥ ३२

ब्रह्म

मध्ये॥ॐ गुरुभ्यो॰॥पूर्वे॥ॐ परमगुरुभ्यो॰॥दक्षिणे॥ॐ परमेष्ठिगुरुभ्यो॰॥पश्चिमे॥ॐ परात्परगु
रुभ्यो॰॥उत्तरे॥ॐ समस्तब्रह्मविद्यासंप्रदायिभ्यो॰॥लक्ष्मपंचकस्येशान्ये॥मध्ये॥ॐ आत्मने॰॥पूर्वे॥
ॐ अंतरात्मने॰॥दक्षिणे॥ॐ परमात्मने॰॥पश्चिमे॥ॐ सर्वात्मने॰॥उत्तरे॥ॐ परब्रह्मणे॰॥ततः
दिक्षु प्रागादिलोकपालावाहनं॥ॐ इंद्राय॰॥ॐ अग्नये॰॥ॐ यमाय॰॥ॐ निर्ऋतये॰॥ॐ वरुणा
य॰॥ॐ वायवे॰॥ॐ कुबेराय॰॥ॐ ईशानाय॰॥ईशानपूर्वयोर्मध्ये॥ॐ ब्रह्मणे॰॥निर्ऋतिवरुणयो
र्मध्ये॥ॐ अनंताय॰॥इत्यावाह्य पुरुषसूक्तेन षोडशोपचारैः संपूज्य स्तुत्वा नमेत्॥पुष्पांजलिं
वक्ष्यमाणमंत्रैर्दद्यात्॥लक्ष्मपंचके॥लक्ष्मीकलत्रं शतपत्रनेत्रं पूर्णेंदुवक्त्रं पुरुहूतमित्रं॥का
रुण्यपात्रं कमनीयगात्रं वंदे पवित्रं वसुदेवपुत्रं॥१॥नमस्ते वासुदेवाय शुद्धबुद्धस्वरूपिणे
॥हिरण्यरेतसे तुभ्यं ब्रह्माधात्यव्यक्तरूपिणे॥२॥नमोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशि

६ ततो मंत्रपुष्पांजलिं दत्वा प्रदक्षिणां कुर्यात्॥ पदे पदे महापापसंघान् दंति सत्कृता॥ प्रदक्षिणां ता
मङ्गत्यागृह्णाण जगदीश्वर॥ १॥ इति प्रदक्षिणां कृत्वा नमस्कारं कुर्यात्॥ व्यक्ताव्यक्तं स्थूलसूक्ष्मं निर्गु
णं सगुणं प्रभुं॥ विश्वव्यापीनमीशानं वंदे देवं रमापतिं॥ १॥ ततः
३३ शेषाद्देव॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः॥ ३॥ कामरूपं कला
वंतं कामिनीकामदं प्रभुं॥ मन्मथं मथुरानाथं प्रद्युम्नं प्रणमाम्यहं॥ ४॥ अनिरुद्धं महोदारं कामिनं
सुंदरं प्रियं॥ नमाम्यहं प्रपन्नेशं फुल्लेंदीवरलोचनं॥ ५॥ व्यासपंचके॥ वेदव्यासं स्वात्मरू
पं सत्वसंधुपरायणं॥ जितेंद्रियं जितक्रोधं सशिष्यं प्रणमाम्यहं॥ १॥ आचार्यपंचके॥ सर्वशास्त्रा
र्थतत्वज्ञं परमानंदरूपिणं॥ ब्रह्मरूपं शंकराचार्यं प्रणमामि विवेकिनं॥ १॥ परात्परतरं शांतं यो
गींद्रैर्योगिसेवितं॥ जितेंद्रियं जितक्रोधं सशिष्यं प्रणमाम्यहं॥ २॥ स्वासने स्थित्वा नियमप्रार्थनां ततः६
७न् कुर्यात्॥ माधवश्चतुरो मासान् सर्वभूतहिताय वै॥ स्वापं यास्यति शेषांके लक्ष्म्या सह जगत्पतिः॥ १॥
सुप्तश्चेवोत्थितो यावद्भवेद्यावत्सनातनः॥ अहं च तावत्स्वास्यामि सर्वभूतहिताय च॥ २॥ प्रायेण
प्रावृषि प्राणिसंकुलं वर्त्म दृश्यते॥ अतस्तेषामहिंसार्थं पक्षान्वै श्रुतिसंज्ञकान्॥ ३॥ स्वास्यामि ३३

३१

चतुरो मासानत्रैवासति बाधके॥ चतुरो यं वसेन्मासान् द्वौ वा कौशिकवार्षिकौ॥ ४॥ वार्षिकांश्चतुरो
मासान्विदद्रेन्नयतिं क्वचित्॥ बीजांकुराणां जीवानां हिंसातन्नयतो भवेत्॥ ५॥ अंडजै रुद्भिजैर्वापि
मि२ प्राणिर्व्याप्यते मही॥ स्वदेशैर्वर्जितैस्तथा व्यक्तैर्नानारूपैः समंततः॥ ६॥ एतेषां रक्षणार्थाय धात्रा।
ग्रामे निवसाम्यहं॥ उक्तवेतमिति ब्रूयुः पार्श्वस्थाये द्विजोत्तमाः॥ ७॥ निवसंतु सुखेनात्र गमिष्यामः
सदा मुदा॥ चातुर्मास्यं यतीनां च यः कारयति भक्तिमान्॥ ८॥ सर्वतीर्थेषु यत्पुण्यं सर्वदानेषु यत्फ
लं॥ तत्सर्वं लभते मर्त्यो धार्मिको विष्णुपूजने इति॥ ९॥ शेषपर्यंकवर्येस्मिन्लक्ष्म्या मणिगणान्वि
ते॥ श्वेतद्वीपांतरे देव कुरु निद्रां जगत्पते॥ १०॥ सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदं॥ विबुद्धे
च विबुद्धेत प्रसन्नो मे भवाच्युत॥ २ ॥ इति संप्रार्थ्य॥ श्वेतद्वीपे भोगिनाथे योगिनाथे स्थिते
त्वयि॥ चातुर्मास्यव्रतं तु ज्ञां देहि लक्ष्मीपते मम॥ १॥ चतुरो वार्षिकान्मासान् देवस्योत्थापना न्
५ दर्शनात्सदा वासाच्च भाषणाद्भिवंदनात्॥ ६॥ भिक्षादानाद्दस्तदानात्सिद्धा मः कृतार्थतां॥ त्वयि तु केन
गन्नाथे सुखे भवति सर्वदा॥ ९॥ त्वयि सुप्ते देवगणाः संतोषं यांति सर्वदा॥ अतो न वृद्धिः स्यात्तथा चातुर्मास्य
व्रतावधि॥ ८॥ यथाशक्त्या च शुश्रूषां करिष्यामो वयं मुदा॥ ततोग्रदस्यैः प्रार्थितो भिक्षुरत्रैव स्वास्यामीति वदेत्

पद्मस्तेगंधपुष्पाद्यैरर्चितं जलमुद्गृह्य ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां
याति सद्यो वंदे तमच्युतं ॥१॥ अनेन यथाशक्ति यथाज्ञानकृतेन श्रीकृष्णव्यासाचार्यादीनां पूजने
न श्रीपरमेश्वरः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ततो विधिव
३४ द्धि ॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ॥२॥ इदं व्रतं मया देव गृहीतं पुरतस्तव ॥ निर्वि
घ्नं सिद्धिमायातु प्रसादात्ते रमापते ॥३॥ अथ नियमः ॥ सीमोल्लंघनमक्षौरं नखच्छेदनमेव च ॥ घर
एकस्मिन्स्थाने कर्त्तव्या किंसैवं व्रतमाचरेत् ॥१॥ गृहीतेस्मिन्व्रते देव पंचत्वं यदि नो भवेत् ॥ तदा
भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ॥२॥ गृहीतेस्मिन्व्रते देव यद्यपूर्णे म्रियेत् ह्यहं ॥ तन्मे भवतु सं
५सं पूर्णं त्वत्प्रसादाज्जनार्दन ॥३॥ इति प्रार्थ्य नमस्कारान्कुर्यात् ॥ अनंतरं गृहस्थैः गंधपुष्प
धूपदीपनैवेद्यकौपीनाच्छादनदोरकगोपीचंदनमर्दनकाष्ठाद्युपचारैः सम्यक् संन्यासि
नां पूजा कार्या ॥ ततो द्वितीयदिवसे देवं संपूज्य विसर्जयेत्तद्दिने वा ॥ उत्तिष्ठोत्तिष्ठ गच्छस्व पुन
रागमनं च ॥ अत्रिः ॥ नासमानसहायेषु निवसेद्योगवित्क्वचित् ॥ वसेत्समानशीलेषु स्व
शीलेषु तपस्विषु ॥१॥ इति व्यासपूजाविधिः ॥ ॥ अथात्रैतिहासः ॥ दाल्भ्य उवाच ॥ विष्णु ३४
र्कुरु ॥ प्रसाददेवदेवेशपरिवारेण संयु

धर्मास्त्वया व्याख्याताः श्रुताश्च त्वत्प्रसादतः ॥ कतिथोक्तं च मासेषु व्यासरूपी जनार्दनः ॥१॥ पूज्यते के ये
न विधिना किंफलं तद्वद प्रभो ॥ आषाढस्यासिते पक्षे पर्वण्यो ह्यपि नीयदा ॥२॥ पूर्णमासी तदा
तत्र व्यासरूपी जनार्दनः ॥ पूज्यश्च यतिभिः सर्वैर्हंसैः परमहंसकैः ॥३॥ तेपि सर्वे प्रपूज्या वै गृ
हमेधिभिरादरात् ॥ सर्वतोभद्रमालिख्य तत्र वै कलशं न्यसेत् ॥४॥ सौवर्णं राजतं ताम्रं कलशं ४ वापि वंश
स्थापयेत्ततः ॥ द्वादशारंध्रकं वाथ सौत्रे वा पट्टसूत्रके ॥५॥ कालज्ञानं विधायाथ पूज्यास्तत्र तु देव पात्रे ततो
ताः ॥ तत्र यंत्रविधानेन व्यासरूपी जनार्दनः ॥६॥ उपचारैः षोडशभिः पूजनीयः प्रयत्नतः ॥ पौरा परि ॥
णैर्नाममिर्वापि वेदमंत्रैर्विशेषतः ॥७॥ गृहस्थैर्नरनारीभिस्तथा विद्यार्थिभिर्जनैः ॥ तंदुलैः श्वेत
पुष्पैश्च नानावस्त्रैः फलैरपि ॥८॥ कौपीनैर्दंतकाष्ठैश्च एकैश्च विशेषतः ॥ सौवर्णै राजतैर्वापि
नारिकेलफलादिभिः ॥९॥ नानाखाद्यविशेषैश्च तत्र पूजा फलं शृणु ॥ वासुदेवप्रसादेन सर्ववि

ध्याविशारदः॥१०॥सर्वशास्त्रप्रवीणश्च सर्वशास्त्रधुरंधरः॥गजवाजिरथाद्यैश्च युक्तः सर्वगुणैर
पि॥११॥युक्तः कलत्रपुत्रादिधनधान्यादिभिस्तथा॥चतुरंगबलोपेतः सप्तांगराज्यधृक्सदा॥१२॥
मेधाप्रज्ञाधृतिः कीर्तिः सौभाग्यमतुलं लभेत्॥सत्यं दयाक्षमा शांतिर्दाक्षिण्यमतुलं लभेत्॥१३॥
सभापांडित्यमौदार्यं गांभीर्यमतुलं लभेत्॥भुक्त्वा भोगान्यथाकाममंते विष्णुपदं व्रजेत्॥१४॥इति वि
ष्णुधर्मोत्तरे दाल्भ्यविष्णुसंवादे व्याससृजानिषिद्धो वितिहासः॥ ॥अथ यतिसंस्कारः॥सिद्धानंत
रं पुत्रादिः शिष्यो वा स्नात्वाऽधिकारसिद्ध्यर्थं वपनं कृच्छ्राचरणे कुर्यात्॥तत्र संकल्पः॥करिष्यमा
णयतिसंस्कारेऽधिकारार्थं कृच्छ्रत्रयात्मकं प्रायश्चित्तं प्रतिकृच्छ्रमेकैकगोनिष्क्रयद्रव्यद्वाराऽहमा
चरिष्ये॥इति संकल्प्य एवं कृत्वा वपनं कुर्यात्॥पुत्रातिरिक्तस्य वपनं नेति केचित्॥देशकालौ संकी
र्त्य ब्रह्मलीनस्य नारायणस्वरूपिणं भिक्षुं शौनकोक्तविधिना संस्करिष्य इति संकल्प्य॥अत्रणं नवं क ३५

नारायणपरो ध्याता ध्यानं नारायणः परः॥२

लशमादाय तीर्थोदकेनापूर्य तदुदकं गंगे च यमुने चैव गोदावरि सरस्वति॥नर्मदे सिंधुकावेरि जलेऽ
स्मिन्संनिधिं कुरु॥१॥नारायणपरं ब्रह्म तत्त्वं नारायणः परः॥यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि
ण॰ ३ वा॥अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥२॥देवदत्त तथा किंचिद्ब्रह्मैव तिरोहितं गतं॥इदानीं ब्रह्मै
व संप्राप्तस्तस्य ब्रह्मत्वमुच्यते॥३॥इत्येतैर्मंत्रैः कलशमभिमंत्र्य॥प्राणायामपुरःसरं रौद्रमंत्रैर्वि
ष्णुसूक्तैरापोहिष्ठेति तिसृभिर्यतेः स्नानं कारयित्वा॥पश्चात्तच्छरीरं वस्त्रचंदनाद्युपचारैरभ्य
र्च्य शिक्यशरीरमारोप्य गंधपुष्पैरलंकृत्य मंत्रघोषैर्जयशब्दादिभिर्दुंदुभिनादैर्नैशरवैरपि ग्रा
मात्प्राचीमुदीचीं वा दिशं नीत्वा शुद्धदेशं समाश्रयेत्॥नदीतीरे चाश्वत्थमूले देवतायतनेऽपि वा॥अ
धस्ताद्बिल्ववृक्षस्य गर्तं कुर्याद्यथाविधि॥१॥ततो भूमिं व्याहृतिभिः संप्रोक्ष्य दंडप्रमाणमधो
गर्तं चतुरस्रां देवयजननाम्नीं खनित्वा तन्मध्ये स्वल्पगर्तं सार्द्धहस्तपरिमितं कृत्वा सप्तव्याहृति

पुरुषसूक्तंभ्रुवोर्मध्येजपेत्॥ब्रह्मजज्ञानं०विव:॥इतिमूर्ध्निजपेत्॥९

३९ त्रि:पंचगव्येनप्रोक्ष्य॥जलसमाधिपक्षेगर्त्तस्थानेमहानदींवापरिकल्प्य॥तत्रपंचगव्यंप्रक्षिप्यदक्षि
णाग्रान्कुशानास्तीर्यतत्रविन्यस्यशरीरंसंप्रोक्ष्यपुरुषसूक्तेनशंखोदकेनसंस्नाप्यप्रणवेनवाऽष्टो
त्तरशतवारंसंस्नाप्यषोडशोपचारैरभ्यर्च्यतुलस्यादिमिलितपुष्पमालाभिरलंकृत्य॥विष्णोर्द
क्षिणेरक्षस्वेतिशरीरंगर्तेनिधायवानिधाय॥ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥समूढमस्य
पांसुरेस्वाहेतिदक्षिणहस्तेदंडंत्रेधाकृत्वानिधाय॥ॐहंस:शुचिषद्वसुरंतरिक्षसद्धोतावे
दिषदतिथिर्दुरोणसत्॥नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत्॥१॥परे
णनाकंनिहितंगुहायांविभ्राजदेतद्यतयोविशंति॥२॥वेदांतविज्ञानसुनिश्चितार्था:संन्यास
योगाद्यतय:शुद्धसत्त्वा:॥तेब्रह्मलोकेषुपरांतकालेपरामृतात्परिमुच्यंतिसर्वे॥३॥इतिहृद
येजपेत्॥विष्णोरराटमसिविष्णो:पृष्ठमसिविष्णो:श्नप्त्रेस्थोविष्णो:स्यूरसिविष्णोर्ध्रुवम ३९

निर्णयसिंधौरूपक:॥यदस्यपारेइतिसव्येशिक्यं॥येनदेवा:
पवित्रेणेतिमुखेजलपवित्रं॥सावित्र्योदरेपात्रं॥कृमि:श्व
भ्रेतिगुह्येकमंडलुंनिधाय५ भिक्षा

सिवैष्णवमसिविष्णवेत्वा॥१॥इतिनाभौजपेत्॥देवस्यत्वा०हस्तयो:॥१॥इतिकर्णयो:॥ॐभूमिर्भूमि
मगान्मातामातरमप्यगात्॥भूयास्मपुत्रै:पशुभिर्योनोद्वेष्टिसभिद्यतामितिमंत्रेणमूर्धानमश्म
नापरशुनाशंखेननारिकेलेनवाभिंद्यात्॥शिरोभेदनंकर्तुमशक्तश्चेत्तदातच्छिरसिगुडपिंडमन्य
द्वाफलंनारिकेलादिनिधायभिंद्यादित्याचार:॥दर्भैराच्छाद्यप्रणवेनदेवयजनंत्वेत्यसिकतादि
नापूरयेत्॥तथादोवेच्छिरोभेदनानंतरंभूरित्यादिनाभिमंत्र्यदर्भैराच्छाद्यभूर्भुव:स्वरोमित्यभिमं
स्वाहांते त्र्य॥पाषाणैर्दृढंबध्वाजलेमहाह्रदेप्रणवेनेनिक्षिपेदंडंमोचयेत्॥तत:॥अग्निनाग्नि:समिध्यतेक
न५ विर्गृहपतिर्युवा॥हव्यवाड्जुह्वास्य:॥त्वंह्यग्नेअग्निनाविप्रोविप्रेणसन्सता॥सखासख्यासमिध्य
से॥तंमर्जयंतसुक्रतुंपुरोयावानमाजिषु॥स्वेषुक्षयेषुवाजिनं॥यज्ञेनयज्ञमयजंतदेवास्तानिधर्मा
णिप्रथमान्यासन्॥तेहनाकंमहिमान:सचंतयत्रपूर्वेसाध्या:संतिदेवा:॥इतिचतस्रोऋच:॥ॐ

३७ चितिः स्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः ॥ आधीतं बर्हिः ॥ केतो अग्निः ॥ विज्ञातमग्निः ॥ वाक्पतिर्होता ॥
मन उपवक्ता ॥ प्राणो हविः ॥ सामाध्वर्युः ॥ वाचस्पते विधे नामन् ॥ विधेम ते नाम ॥ विधेस्त्वमस्माकं
नाम ॥ वाचस्पतिः सोमं पिबतु ॥ आस्मासु नृम्णं धात्स्वाहा ॥ १ ॥ पृथिवी होता ॥ द्यौरध्वर्युः ॥ रुद्रोऽग्नी
त् ॥ बृहस्पतिरुपवक्ता ॥ वाचस्पते वाचो वीर्येण ॥ संभृततमेनायक्ष्यसे ॥ यजमानाय वार्यं ॥ आसु
वस्करस्मै ॥ वाचस्पतिः सोमं पिबति ॥ जजनदिन्द्रमिन्द्रियाय स्वाहा ॥ २ ॥ अग्निर्होता ॥ अश्विनाध्व
र्यू ॥ त्वष्टाग्नीत् ॥ मित्र उपवक्ता ॥ सोमः सोमस्य पुरोगाः ॥ शुक्रः शुक्रस्य पुरोगाः ॥ श्रातास्त इं
द्र सोमाः ॥ वातापेर्हवनश्रुतः स्वाहा ॥ ३ ॥ सूर्यं ते चक्षुः ॥ वातं प्राणः ॥ द्यां पृष्ठं ॥ अंतरिक्षमात्मा ॥
अंगैर्यज्ञं ॥ पृथिवीं शरीरैः ॥ वाचस्पतेऽच्छिद्रया वाचा ॥ अच्छिद्रया जुह्वा ॥ दिवि देवावृधं होत्रा
मेरयस्व स्वाहा ॥ ४ ॥ महाहविर्होता ॥ सत्यहविरध्वर्युः ॥ अच्युतपाजा अग्नीत् ॥ अच्युतमना उ ३७

पवक्ता ॥ अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ ॥ अयास्य उद्गाता ॥ वाचस्पते हृद्विधे नामन् ॥
विधेम ते नाम ॥ विधेस्त्वमस्माकं नाम ॥ वाचस्पतिः सोममपात् ॥ मा दैव्यस्तंतुश्छेदि मा मनुष्यः ॥
नमो दिवे ॥ नमः पृथिव्यै स्वाहा ॥ ५ ॥ इति पंचानुवाकाः सप्तदश ॥ अतो देवा अवंतु न इति षडृचे जि
कृ४ पेत् ॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे ॥ पृथिव्याः सप्त धामभिः ॥ इदं विष्णुर्वि० ॥ त्रीणि पदा० ॥
विष्णोः कर्माणि० ॥ तद्विष्णोः परमं० ॥ तद्विप्रा० ॥ जन्मादि संस्कारवितत पापैर्मुक्ता वयमश्वमेधसदृश फ
लं प्राप्नुम इति भावयंतो नमस्कृत्याऽवभृथ नबुध्यास्नात्वा गंधादि धृत्वा नैवेद्य शेषं गृहीत्वाऽगमा
धि७ नोम्बवार्द्धकोस्ववागच्छेयुरुच्चैर्हरिस्मरणपुरःसरं ॥ पुत्रश्चेत्स्यात्केतुनेत्यनुवाकं गर्त्तस्य हृदयेऽस्य वा
पश्चादुपविश्य होता वदेत्क सत्येन शंसेत् ॥ प्रकेतुना बृहता भात्यग्निरा विविश्वानि वृषभो रोरवी
ति ॥ दिवश्चिदंतादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥ १ ॥ इदं त एकं पर उ त एकं तृतीयेन ज्योति

३८ वासंविशस्व॥संवेशनस्तनुवैचारुरेधिप्रियोदेवानांपरमेसधस्थे॥३॥माकेसुपर्णमुपयत्पतंतंहृ न८
दावेनंतोअभ्यचक्षतत्वा॥हिरण्यपक्षंवरुणस्यदूतंयमस्ययोनौशकुनंभुरण्युं॥३॥अतिद्रवसार
मेयौश्वानौचतुरक्षौशबलौसाधुनापथा॥अथापितॄन्त्सुविदत्रांअपीहियमेनयेसधमादं
मदंति॥३॥यौतेश्वानौयमरक्षितारौचतुरक्षौपथिरक्षीनृचक्षसा॥ताभ्यांराजन्परिदेह्येनंस्वस्ति
चास्माअनमीवंचधेहि॥३॥उरुणसावसुतृपाउदुंबलौयमस्यदूतौचरतोजनांअनु॥ताव
स्मभ्यंदृशयेसूर्यायपुनर्दातामसुमद्येहभद्रं॥३॥सोमएकेभ्यःपवतेघृतमेकउपासते॥येभ्यो
मधुप्रधावतितांश्चिदेवापिगच्छतादों३॥येयुध्यंतेप्रधनेषुशूरासोयेतनूत्यजः॥येवास
हस्रदक्षिणास्तांश्चिदेवापिगच्छतादों३॥तपसायेअनाधृष्यास्तपसायेस्वर्ययुः॥तपोये
चक्रिरेमहस्तांश्चिदेवापिगच्छतादों३॥ततोग्निरग्निरित्यादिनिर्विशेषः॥ ॥ततःकर्तास्नात्वा ३८

चक्ष्यसिद्धिंगतस्यब्रह्मीभूतस्यनारायणरूपिणस्तस्यार्थंतर्पणंकरिष्यइतिसंकल्प्य॥सव्येनदेवतीर्थेनै
व॥आत्मानंतर्पयामि॥अंतरात्मानंतर्पयामि॥परमात्मानंतर्पयामि॥इत्याद्यस्याचलवारंतर्पणंकुर्या
त्॥ततःशुक्लपक्षेमृतस्यकेशवादिद्वादशनामभिः॥कृष्णपक्षेमृतस्यसंकर्षणादिद्वादशनामभिः॥इ
त्येवंतर्पणंकुर्यात्॥इदंतर्पणं[illegible]क्षीरेणेतिकेचित्॥तीरंप्राप्यधौतवस्त्रंपरिधायाचम्य॥सिद्धिंगत
स्यब्रह्मीभूतस्यपरमहंसस्यनारायणरूपिणस्तस्यार्थंषोडशोपचारैर्नारायणपूजनंकरिष्येइतिसं
कल्प्य॥देवयजनोपरिनदीतीरेवाचतुरस्रवेदिकांसंपाद्यतत्रमृन्मयंलिंगंसंस्थाप्यालंकृत्याशक्तौन
द्यांजलएवतत्स्वरूपंविचिंत्यवापुरुषसूक्तेनैकैकर्चंतेनमोनारायणायेतिमंत्रमुक्त्वातमंत्रसहितषो
डशभिरुपचारैर्वादनादिषोडशोपचारपूजांकृत्वाघृतमिश्रपायसबलिंनिवेद्यघृतदीपंचनिवेद्य॥तं
निवेदितंपायसंनद्यादिजलेक्षिपेत्॥ततःशंखेशुद्धजलमादायतत्रगंधपुष्पतुलसीदलफलादिकं

३९ चरिष्ठियप्य॥ॐ ब्रह्मणेनमः इदमर्घ्यंसमर्पयामीत्येवमष्टावर्घ्याणिषष्ठदिक्षु दत्वागंदंगवेदितिप्र
थमदिनकृत्यं॥एवंदशदिनपर्यंतंक्षीरतर्पणपूजनपायसबलिदानदीपदानार्घ्यदानानिप्रत्यहं
कुर्यात्॥ ॥ततएकादशेकृिपार्वणं॥तत्रप्रयोगः॥एकादशाहे पुत्रःप्रातःस्नातःकृतनित्यक्रियो
मध्याह्ने विप्रानाहूय नद्यादौ तिलतर्पणंकृत्वादेशकालौसंकीर्त्य प्राचीनावीती॥काश्यपगोत्रस्य
ब्रह्मीभूतस्यकेशवशर्मणोममपितुःकरिष्यमाणदर्शादिसर्वश्राद्धाधिकारार्थमेकपार्वणश्रा
द्धंकरिष्ये इतिसंकल्प्य॥यज्ञोपवीतिपुरूरवार्द्रवसंज्ञकविश्वेदेवार्थंद्वावेकंवानिमंत्र्यप्राचीनावी
तित्वस्यपितुः॥ काश्यपगोत्रस्यब्रह्मभूतस्यकेशवशर्मणोवसुरूपस्यस्थानेक्षणः क्रियतां॥पि
तामहस्य॰ प्रपितामहस्यस्थानेइत्यादि॰॥विप्रैकपक्षेब्रह्मीभूतपितृपितामहप्रपितामहानामि
त्यादिदर्शश्राद्धवत्पित्रादित्रीनुद्दिश्यपार्वणविधिनैवश्राद्धंसमाप्ययथाधिकारंवैश्वदेवादि ३९

कृत्वासुहृद्युक्तोभुंजीतेति॥पुत्रादन्यःशिष्यःकर्ताचेत्तद्यादौयज्ञोपवीत्येव॥आत्मानंतर्पयामि॥
अंतरात्मानंतर्पयामि॥परमात्मानंतर्पयामि॥इतिदेवतीर्थेनैकैकमंजलिंदत्वागद्दमेत्यप्राणानाय
म्यदेशकालौस्मृत्वाब्रह्मीभूतस्यगुरोःप्रत्यब्दादिश्राद्धाधिकारसिद्ध्यर्थमेकपार्वणश्राद्धंकरिष्य इ
तिसंकल्प्य॥साधुरुरुसंज्ञकविश्वेदेवार्थंक्षणः क्रियतामितिविप्रद्वयमेकंवानिमंत्र्य॥संबंधना
माद्युच्चारवर्जंगुरोः॥तत्रगुरोःकर्तव्यपार्वणश्राद्धेआत्मनःस्थानेक्षणःक्रियतामितिक्षणंदत्वा॥ न५
एवमंतरात्मनःस्थाने॰॥परमात्मनःस्थाने॰॥विप्रैकपक्षे॥आत्मांतरात्मपरमात्मनांस्थानेक्षणःक्रिय
तामितिविशेषः॥ततोब्राह्मणान्कृतपद्धौचानाचांतान्प्राङ्मुखानुदङ्मुखांश्चोपवेश्यसाधुरुरुसंज्ञका
नांविश्वेषांदेवानामिदमासनमित्यादिवैश्वदेवार्चनंविधाययज्ञोपवीत्येव॥आत्मनइदमासनंस्वा॰
हानममेतियवसहितकुशंजुदर्भद्वयरूपमासनंदक्षिणतोदत्वा॥एवमग्रेपि॥अंतरात्मनइदमास

६० नं ॥ परमात्मन इदमासनं ॥ ततः प्रागग्रदर्भोपरि पात्रत्रयं प्राक्संस्थमासाद्य प्रतिपात्रे दर्भद्वयान्वि
तेजलमासिंच्य शन्नोदेवीरिति सकृदनुमंत्र्य ॥ यवोसिसोमदेवत्यो० नः ॥ प्र त्नवद्भिः प्रत्नः स्वाहा
र्श्वात्मन इमांल्लोकान्प्रीणयाहि नः स्वाहा न मम ॥ इति मंत्रेण प्रतिपात्रे यवानोप्य तूष्णीं वा गंधपु
ष्पाणि च प्रक्षिप्य स्वाहार्घ्या इति निवेद्य ॥ आत्मन्निदमर्घ्यं स्वाहा न मम ॥ अंतरात्मन्निदमर्घ्यं स्वा० ॥
परमात्मन्निदमर्घ्यं स्वा० ॥ इत्यर्घ्यं दत्वा ॥ आत्मन्नेष गंधः ॥ अंतरात्मन्नेष गंधः ॥ परमात्मन्नेष गंधः ॥
एवमिमानि पुष्पाणि ॥ एष धूपः ॥ एष दीपः ॥ इदमाछादनं ॥ इत्यभ्यर्च्य ॥ भोजनपात्राण्यासाद्यो
पस्तीर्य भोजनार्थदन्नादुद्धृत्य घृताक्तं कृत्वा ॥ आत्मने स्वाहा ॥ अंतरात्मने स्वाहा ॥ परमात्म
ने स्वाहेति यथाशाखमग्नौ पाणिषु वा कृत्वा ॥ अत्राग्नौकरणं नास्तीति केचित् ॥ ततोन्नादिप
रिविष्य गायत्र्या प्रोक्ष्य ॥ पृथिवीते० इदं विष्णु० ॥ साधुरुरुसंज्ञिकेभ्यो विश्वेभ्यो देवेभ्य इदमन्नं ६०

यथाशक्ति सोपस्करं स्वाहा न मम ॥ आत्मने इदमन्नं० ॥ अंतरात्मने इदमन्नं० ॥ परमात्मने इदमन्नं० ॥
इति त्यागं कृत्वा ॥ ब्रह्मार्पणं० ॥ एको विष्णुः० ॥ अनेन ब्राह्मणभोजनेन नारायणः प्रीयतां ॥ ॐ तत्स०
त् ॥ अपामेध्यमिति वर्दिरादृत्य अपहतेति प्रागग्रमेकां रेखां कृत्वेत्यादि ॥ मार्जयंतामात्मनः ॥ मा
र्जयंतामंतरात्मनः ॥ मार्जयंतां परमात्मनः ॥ इति दर्भमूलमध्याग्रेषु त्रिषु स्थानेषु जलं निनीय ॥ आ
त्मन्नयं ते पिंडः स्वाहा न मम ॥ अंतरात्मन्नयं ते पिंडः स्वाहा न मम ॥ परमात्मन्नयं ते पिंडः स्वाहा
न मम ॥ इति पिंडत्रयं दत्वा ॥ तूष्णीमनुमंत्रणादि पिंडप्रवाहणांतं समाप्य ॥ गुरूक्तेभ्यो ब्राह्मणेभ्यो तां
बूलदक्षिणां दत्वा नमस्कृत्य विसृज्य वैश्वदेवादि कृत्वा सुहृद्युक्तो भुंजीतेति शिष्टप्रतिपादनप्रयो
गः ॥ ॥ ततो द्वादशे क्षितिपतीनां नारायणबलिप्रयोगः ॥ एकादशे द्वादशे वेति विहितकाले शुद्धः स्ना
त्वाचम्य प्राणानायम्य देशकालौ संकीर्त्य ब्रह्मीभूतस्य गुरोः सिद्धिदिनादारभ्य द्वादशेह्नि विष्णुके:

४१ शवादिद्वादशरूपिणोगुरोःसंभाविनसर्वपापक्षयपूर्वकविष्णुलोकावाप्तिद्वाराश्रीनारायणप्रीत्य
र्थंनारायणबलिंकरिष्ये॥लक्ष्मपक्षेतुतस्यतुकेशवादिस्थानेसंकर्षणादीन्युक्त्वा॥ततस्त्रयोद
शवरान्यतीन्संभवेत्रयोदशविप्रान्वासपत्नीकत्वसाधुत्वादिगुणयुक्तान्निमंत्रयेत्॥ततःसूक्ते॥
केशवरूपीगुर्वर्थेनिवद्भिःक्षणःकर्तव्यः१॥नारायणरूपीगुर्व०२॥माधवरूपी०३॥गोविंदरूपी०४॥
विष्णुरूपी०५॥मधुसूदनरूपी०६॥त्रिविक्रमरूपी०७॥वामनरूपी०८॥श्रीधररूपी०९॥हृषीकेश
रूपी०१०॥पद्मनाभरूपी०११॥दामोदररूपी०१२॥लक्ष्मे॥संकर्षणरूपीगुर्वर्थेनिवद्भिःक्षणःकर्त
व्यः१॥वासुदेवरूपी०२॥प्रद्युम्नरूपी०३॥अनिरुद्धरूपी०४॥पुरुषोत्तमरूपी०५॥अधोक्षजरूपी०६॥
नारसिंहरूपी०७॥अच्युतरूपी०८॥जनार्दनरूपी०९॥उपेंद्ररूपी०१०॥हरिरूपी०११॥लक्ष्मरूपी०१२॥
इतिद्वादशविप्रान्निमंत्र्यत्रयोदशंविप्रमात्मसंस्थत्वजितेंद्रियत्वगुणकंविष्णवर्थेनिवद्भिःक्ष ४१

णःकरणीयः॥इतिनिमंत्र्यपादान्प्रक्षाल्यप्राङ्मुखाननुपवेशयेत्॥ततोर्चनगृहेहोमस्थानंप्र
कल्प्यतत्रस्थंडिलेयन्त्रकचाग्निमितिविधिनाग्निंप्रतिष्ठाप्यपायसमष्टत्रिंशदाहुतिपर्याप्तंपु
रुषाहारपर्याप्तंविष्णुनैवेद्यार्थंचश्रपयित्वाभिघार्यप्राचीमुदीचींवोद्वास्यप्रतिष्ठितमभिघार्येति
ग्निमिंधेत्याद्यग्निमुखांतंकृत्वा॥कर्ताश्वलायनश्चेत्क्रियमाणेहोमेस्थंडिलादिकरिष्ये॥इत्याद्यग्नि
ध्यानांतेन्वादध्यात्॥समिद्वयमादायक्रियमाणेनारायणबलिहोमेदेवतापरिग्रहार्थमन्वाधानंक
रिष्ये॥अस्मिन्नन्वाहितेग्नावित्याद्युक्तचक्षुषीआज्येनेत्यंतमुक्त्वात्रप्रधानंअग्निंवायुंसूर्यंप्रजापतिं
चव्यस्तसमस्तव्याहृतिभिरेकैकयापायसाहुत्यानारायणंपुरुषसूक्तेनप्रत्यृचमेकैकयापायसाहु
त्याकेशवादिद्वादशदेवताः॥लक्ष्मेसंकर्षणादिद्वादशदेवताएकैकयापायसाहुत्याशेषेणेत्या
दिस्वर्णपात्रनिधानांतेनद्विपंचाशदधिकशतमुष्टींस्तंडुलान्निरूप्यावघातादिपायसंश्रपयित्वेत्याद्यन्त
विष्णुरतोदेवेतिषड्भिःप्रत्यृचमेकैकयापायसाहुत्या३

४२ भागांतं कुर्यात्॥ इति विशेषः॥ ततोग्रेण पिंशालिग्रामे विष्णुं पुरुषसूक्तेन प्रत्यृचं नमो नारायणाये
त्यं ते षोडशोपचारैरभ्यर्च्याग्निसमीपमेत्यावदानसंपदा स्रुवादसेन वा होमं कुर्यात्॥ तत्र क्रमः॥
ॐ भूः स्वाहा॥ अग्नय इदं०१॥ ॐ भुवः स्वाहा॥ वायव इदं०२॥ ॐ स्वः स्वाहा॥ सूर्यायेदं०३॥ ॐ भूर्भु
वः स्वः स्वाहा॥ प्रजापतय इदं०४॥ ॐ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे॥ पृथिव्याः सप्त धामभि
रिः स्वाहा॥ विष्णव इदं न ममेति षट्स्वपि त्यागः५॥ इदं विष्णुः०६॥ त्रीणि पदा०७॥ विष्णोः कर्माणि०८॥
तद्विष्णोः०९॥ तद्विप्रासो०१०॥ ॐ सहस्रशीर्षा०भुजं स्वाहा॥ नारायणायेदं न ममेति षोडशाहुति
षु त्यागः॥११॥ पुरुष०१२॥ एतावा०१३॥ त्रिपादू०१४॥ तस्माद्वि०१५॥ यत्पुरुषे०१६॥ तं यज्ञं०१७॥
तस्माद्यज्ञा०१८॥ तस्माद्य०१९॥ तस्मादश्वा०२०॥ यत्पुरुषं०२१॥ ब्राह्मणो०२२॥ चंद्रमा०२३॥ नाभ्या
आसी०२४॥ सप्तास्यासन्०२५॥ यज्ञेन०२६॥ केशवाय नमः स्वाहा॥ यथालिंगं त्यागः॥२७॥ नारायण ४२

य०२८॥ माधवाय०२९॥ गोविंदाय०३०॥ विष्णवे०३१॥ मधुसूदनाय०३२॥ त्रिविक्रमाय०३३॥ वामना
य०३४॥ श्रीधराय०३५॥ हृषीकेशाय०३६॥ पद्मनाभाय०३७॥ दामोदराय०३८॥ इत्यष्टत्रिंशदाहु
तीः पायसेन हुत्वा॥ लक्षपक्षे तु तस्य केशवादि द्वादशस्थाने ॐ संकर्षणाय नमः स्वाहा॥ यथालिं
गं त्यागः१॥ ॐ वासुदेवाय०२॥ ॐ प्रद्युम्नाय०३॥ ॐ अनिरुद्धाय०४॥ ॐ पुरुषोत्तमाय०५॥ ॐ अधोक्ष
जाय०६॥ ॐ नारसिंहाय०७॥ ॐ अच्युताय०८॥ ॐ जनार्दनाय०९॥ ॐ उपेंद्राय०१०॥ ॐ हरये०११॥
ॐ कृष्णाय०१२॥ ततः स्विष्टकृतादि तंत्रशेषं समाप्य॥ पुनर्विष्णुं संपूज्य॥ नारायणाय विद्महे वासु
देवाय धीमहि॥ तन्नो विष्णुः प्रचोदयात्॥ विष्णवे नमः इदमर्घ्यं समर्पयामि॥ इत्यर्घ्यं दत्वा॥ हुतशे
षपायसेन पूर्वोक्तमंत्रेण॥ इमं बलिं समर्पयामीति बलिं दद्यात्॥ ततो निमंत्रितब्राह्मणान् भोजये
त्॥ यथा॥ केशवस्वरूपिणे गुरवे नम इदमासनं१॥ नारायणस्वरूपी०२॥ माधवस्वरूपी०३॥ गो

४२ विंदस्वरूपी० ४॥विष्णुस्वरूपी० ५॥मधुसूदनस्वरूपी० ६॥त्रिविक्रमस्वरूपी० ७॥वामनस्वरूपी० ८॥
श्रीधरस्वरूपी० ९॥हृषीकेशस्वरूपी० १०॥पद्मनाभस्वरूपी० ११॥दामोदरस्वरूपी० १२॥इत्यासनंद
त्वा॥कृत्वे॥संकर्षणस्वरूपीणोगुरवेइदमासनं० १॥वासुदेव० २॥प्रद्युम्न० ३॥अनिरुद्ध० ४॥पुरु
षोत्तम० ५॥अधोक्षज० ६॥नारसिंह० ७॥अच्युत० ८॥जनार्दन० ९॥उपेंद्र० १०॥हरि० ११॥कृष्ण० १२॥
एवंगंधपुष्पधूपदीपआछादनानिदत्वा॥त्रयोदशंविप्राग्रंपुरुषसूक्तेनप्रत्यचांतेविष्णवे० वि
ष्णुमावाहयामि॥एवमासनादिपाद्यांतोपचारैरभ्यर्च्य॥चतुरस्रमंडलोपरिभोजनपात्राण्यासाद्योप
स्तीर्यविशिष्टपायसादिभोज्यद्रव्यंपात्रेषुपरिविष्यगायत्र्यातत्त्वात्रस्यमन्त्रेप्रोक्ष॥पृथिवीतेपात्रं०
इदंविष्णुरितिमंत्राभ्यामुपस्पर्शयित्वातत्तद्रूपीगुरूद्देशेनविष्णूद्देशेनचतत्त्वात्रस्यमन्त्रेस्यकृत्वा॥
अतोदेवाअवंतुनइतिषड्भ्र्चं॥ॐतद्ब्रह्म॥ॐतद्वायुः॥ॐतदात्मा॥ॐतत्सत्यं॥ॐतत्सर्वं॥ॐतत्पुरो ४३

नमः॥ॐतश्चरतिभूतेषुगुहायांविश्वमूर्तिषु॥त्वंयज्ञस्त्वंवषट्कारस्त्वमिंद्रस्त्वंरुद्रस्त्वंविष्णुस्त्वं
ब्रह्मत्वंप्रजापतिः॥त्वंतदापआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम्॥इत्यनुवाकंजपेत्॥ततोब्र
ह्मार्पणंब्रह्महविरित्यादिपठित्वा॥आपोशानादिप्राणाहुतिकालेचंद्रमामनसइत्यचमुक्त्वा॥प्राणाय
स्वाहेत्यादिमंत्रैःप्राणाहुतीर्ग्राहयित्वा॥उपविष्टितंयाचितव्यमित्यादिभिःसंप्रार्थ्य॥अपद्वैनाराय
णोकामयतेत्यादिकानोपनिषद्भागान्छ्रावयेत्॥तत्तेषुभुजनः॥ॐतद्ब्रह्मेत्यनुवाकंजपित्वातृप्ताःस्थे
तिपृष्ट्वातत्तदपोशानंदद्यात्॥ततआचांतेषूपविष्टेषुविष्वयङ्क्षिजोच्छिष्टसंनिधौप्रागग्रदुरस्तउपविश्यपत
त्रप्रागग्रान्दर्भानास्तीर्यतेषुॐनमोनारायणायेत्यष्टाक्षरेणाक्षतोदकंदत्वा॥केशवस्वरूपिणोगु
रवेअयंतेपिंडःस्वाहाननममेत्येवंरीत्याद्वादशनामभिर्द्वादशपिंडान्न्यायसेनदद्यात्॥कृत्वे॥संकर्ष
णस्वरूपिणोगुरवेअयंतेपिंडःस्वाहाननममेत्यादि॥यद्वा॥भूःस्वधा॥भुवःस्वधा॥स्वःस्वधा॥इतिवो

ना१

४४ धायनोक्तैस्त्रिभिर्मंत्रैः केशवादिद्वादशमूर्तिरूपिणेऽयं पिंडः स्वाहा न ममेत्येभिर्मंत्रैस्त्रीन्पिंडान्प्राय व१
सेन दद्यात्॥ ततः पूर्ववद्दर्भोदकं दत्त्वा पिंडेषु विष्णुं संपूज्य पुरुषसूक्तेन स्तुत्वा विसर्जयेत्॥ ततो
द्वादश ब्राह्मणेभ्यो नारायणबलिसांगतायै तांबूलदक्षिणां दातुमहमुत्सृजे इति संकल्प्य पूर्ववत्कं दत्त्वा
विष्णुपर्वत्रयोदशद्विजायनाम्नामासीदिति फलं॥ सप्रास्यासन्निति तांबूलं॥ यज्ञेनेति दक्षिणां द
त्त्वा सर्वान्द्विदक्षिणीकृत्य साष्टांगं प्रणम्य यथाशक्त्यानुव्रज्य दर्भपुरःसरं तान्प्रेषयेत्॥ नारायण
बलिकाले पूजितां विष्णुमूर्तिमाचार्याय दद्यात्॥ इत्याचार इति केचित्॥ ततः कर्मेश्वरार्पणं कृत्वा सु
हृद्युतो भुंजीत॥ एतावद्विस्तरतन्त्रयोगाशक्तौ बौधायनोक्तव्याहृतिहोमबलित्रयमात्रसहितो वा
प्रयोगः कार्यस्तैर्मंत्रैः॥ समिदाज्ययोरपि प्रत्येकं होम इति केचित्॥ तत्र मूलं चिंत्यं॥ इति बौधाय
नोक्तशौनकयमस्मृत्यनुसार्याचारानुगृहीतो नारायणबलिप्रयोगः॥ ॥छ॥ ॥छ॥ ४४

समाराधनं करिष्ये॥ श्रीलीमू
तस्य गुरोः २

॥अथ द्वादशाहे त्रयोदशाहे यथाचारं समाराधनं॥ ॥तत्रायं प्रयोगः॥ गुरुचतुष्टयस्य केशवादीनां च ४८
प्रत्येकं कैक इत्येवं षोडश ब्राह्मणपक्षमभिप्रेतोच्यते॥ प्रातर्होमोत्तरं श्रीलीमूर्तस्य गुरोः समाराधनेगु
र्वर्थे नवद्भिः क्षणः कर्तव्यः॥ एवं परमगुर्वर्थे नवद्भिः०॥ परमेष्ठिगुर्वर्थे०॥ परात्परगुर्वर्थे०॥ यथावि
अग्रपधराचार्यार्थे नवद्भिः०॥ ततो गुरुत्रयमिति चत्वारो ब्राह्मणास्तिमंत्र्याः॥ ततः केशवार्थे क्षणः०॥ नवद्भिः४
हृद्ये॥ संकर्षणार्थे नवद्भिः०॥ इत्येवं द्वादश विप्रानिमंत्र्य॥ मध्याह्ने ब्राह्मणानाहूय कृतस्नानाचिराच
म्यपवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य श्रीनारायणप्रीत्यर्थं श्रीलीमूर्तस्य गुरोराराधनं
करिष्ये॥ गंधाक्षततुलसीकर्पूरमिश्रजलेन वरणक्रमेण तेषां पादप्रक्षालनं कृत्वा तानाचाम्य स्व
यं चाचम्य पादप्रक्षालनोदकं पात्रांतरे गृहीत्वा तन्यादौ साकृतगंधपुष्पतुलसीदलैरभ्यर्च्य॥ ज्ञानं
दमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तं॥ योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमा

४५ मि॥ १॥ इति नमस्कुर्यान्॥ एवं सर्वेषां पूजां कृत्वा गंधादिभिस्तत्पात्रमध्ये तत्तद्देवसंनिधिं संस्थाप्य धौ १
कुशासनेषु प्राङ्मुखान्वा उदङ्मुखान्वोपविश्य पुरुषसूक्तेन प्रत्यृचं ॐ नमो नारायणायेति मंत्रसहि
तेनावाहनादिषोडशोपचारपदार्थानुसमयेनार्चयेत्॥ स ह्यागंधपुष्पधूपदीपाच्छादनानि तांबूला
दद्यात्॥ ततः सर्वेषु पात्रेषु पायसादि विशिष्टद्रव्यं साज्यं व्यंजनसहितं च परिविष्य गायत्र्याभ्यो
क्ष्य॥ गुरवे इदमन्नं परिविष्टं परिवेक्ष्यमाणं चान्नपेः स्वाहा द्व्यं न मम॥ एवं परमगुरवे इदमन्नं॥
परमेष्ठीगुरवे इदमन्नं॥ परात्परगुरवे इदमन्नं॥ ततः केशवाय इदमन्नं॥ कृष्णाय॥ संकर्षणा
य इदमन्नं॥ इति सर्वत्रान्नत्यागं कृत्वा॥ ॐ तद्ब्रह्म॥ ॐ तद्वायुः॥ ॐ तदात्मा॥ ॐ तत्सत्यं॥ ॐ तत्स
र्वं॥ ॐ तत्पुरोर्नमः॥ अंतश्चरति भूतेषु गुहायां विश्वमूर्तिषु॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमिंद्रस्त्वं रु
द्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः॥ त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्॥ इत्यनुवा ४५

कं जपेत्॥ ब्रह्मार्पणमित्यादि जपित्वा भोजनेषूपविष्टेषूपनिषद्मंत्रान् श्रावयेत्॥ तत्रेषु ॐ तद्ब्रह्मेत्य
नुवाकं जपित्वोत्तरापोशनोत्तरमाचांतेषूपविष्टेषु विशिष्टतांबूलदक्षिणावस्त्रादिभिरभ्यर्च्य विधे ५२
र्वत्तेषु गुर्वादिधर्मान् गत्वा तीर्थपूजनं करिष्ये॥ चतुरस्रमंडलं गोमयेनोपलिप्य तत्र रंगवल्ल्या
दिभिरलंकृत्य तन्मंडले धान्योपरि पादोदककलशं संस्थाप्य तत्र गंगादिसर्वतीर्थानि भावयित्वा
पुरुषसूक्तेन प्रत्यृचं तीर्थराजाय नमः इत्यनेन षोडशोपचारैरभ्यर्च्य तत्पात्रं शिरसि धृत्वा॥ लो
कः सरस्वत्यां यांत्येष वै देवयानः पंथास्तमेवान्वारोहंत्याक्रोशं तो यांत्सर्वं तिमिवान्यास्मिन्प्रति
षज्यप्रतिष्ठां गच्छंति यदादशशतं कुर्वंत्यथैकमुत्थानं शतमायुः पुरुषः शतेंद्रियस्त्रायुष्येवेंद्रिये
ति प्रतिष्ठंति यदाशतं सहस्रं कुर्वंत्यथैकमुत्थानं सहस्रसंमितो वा असौ लोकोऽमुमेव लोकम
भिजयंति यदेषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थं॥ इत्यनुवाकशेषं॥ नीघासम्॥

४९ धातः पवते॥ आपो देवीति सूर्यः॥ आपा स्मादग्निश्चेंद्रश्च मरुतुर्धावति पंचमइति॥ इत्यनुवाकं च जपि
त्वा हरिकीर्तनपुरःसरं दर्शनं संकृत्वा तत्पात्रं पुनर्मंडले संस्थाप्य चंदनाक्षतपुष्पाणि दत्वा वशि
ष्टानि बंधुभिः सह स्वयं धृत्वा॥ विप्राय्य दक्षिणां दत्वा॥ आनंदमानंदेति॰ गुरुर्ब्रह्मा गुरुर्विष्णुरित्या
दि मंत्रैर्द्विजो स्तीर्थराजं च नमस्कृत्य गुर्वर्थविप्रहस्ते पादोदकपात्रं दत्वा तदाज्ञया तद्दत्ततीर्थमं
त्रेण गृह्णीयात्॥ तत्र मंत्रः॥ अविद्यामूलशमनं सर्वपापप्रणाशनं॥ गुरोः पादोदकं चित्रं संसार
दुमनाशनं॥ १॥ पुत्रादिकामनार्थांतु॥ शोषणं पापपंकस्य दीपनं ज्ञानतेजसः॥ गुरुपादोदकं चि
त्रं पुत्रपौत्रप्रवर्द्धनमिति गृह्णीयात्॥ तान्पुनः प्रणम्य तानन्यांश्च दक्षिणाभिस्तोषयित्वा॥ सन्मा
नपुरःसरं ताननुव्रज्य कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीतेति॥ ततः प्राग्वदर्शमहालयतीर्थपि
तृत्वादि श्राद्धानि कुर्यात्॥ प्रतिमासमेवाराधनं॥ प्रत्यब्दं पार्वणेन तरं वाराधनं चैवमेव॥ इत्येकर ४९

णशक्तौ यथाशक्ति यतीन्यथाशक्ति ब्राह्मणान्वाहूय पादप्रक्षालनपूर्वकं गंधादिभिरभ्यर्च्य भोजयेदि
५२ ति नागरखंडानुसारी चाराणनुगृहीत आराधनप्रयोगः॥ इत्याराधनप्रयोगः समाप्तः॥ ॥छ॥ ॥
अथ यतिसंस्कारे किंचिदुपयोगि निर्णयः॥ तत्र यमः॥ दंडग्रहणमात्रेण प्रेतत्वं नैव जायते॥ प्रेतत्व
स्य विमोक्षार्थं षोडशश्राद्धिको विधिः॥ १॥ पिंडोदकं न वान्यादि कृत्यं स्माविनिवृत्तये॥ सपिंडीकर
णं श्राद्धं पितृत्व प्राप्तये विधिः॥ २॥ अवस्थात्रयहीनानां यतीनां द्वादशेहनि॥ श्राद्धाधिकार सिध्य
र्थं पार्वणं तु समाचरेत्॥ ३॥ नामगोत्र संबंध रूपावस्थात्रयप्रच्युतानां पूर्वसंबंधनामगोत्रोद्दे
शेन क्रियमाणश्रस्पृष्टदर्शादि श्राद्धे पूद्देश्यसिध्यर्थमिस्वर्षः॥ विसिष्टः॥ चतुर्विधानां भिक्षूणां ज्ञाति
बंधुसुतादिभिः॥ एकादशेह्निकर्त्तव्यं श्राद्धं तेषां तु पार्वणं॥ सएव॥ एकोद्दिष्टं जलं पिंडं माशौचं
प्रेतसक्रियां॥ न कुर्यात्पार्वणादन्यद्ब्रह्मीभूतपरिव्रजे॥ २॥ पुलस्त्यः॥ कुटीचकं तु प्रदहेत्परये

४७ नुवक्तुदकं॥ दंसंजले विनिक्षिप्य परमष्टं संप्रकीरयेत्॥१॥ सपिंडनादिने वेषां सर्वेषां स्मृतिशासनात्॥
अहन्येकादशे प्राप्ते पार्वणश्राद्धमाचरेत्॥२॥ सुमंतुः॥ मासिकं नैव कुर्वीत सपिंडीकरणं च न॥ औ
रसः क्षेत्रजो वापि भ्राता वा न सुतोपि वा॥१॥ कुर्यात्तु पार्वणं श्राद्धं शिष्यांतेवासिन्नपि वा॥ पिंडयज्ञ
सुतः कुर्याद्दर्शश्राद्धं मृतेहनि॥२॥ यतेर्महालये दर्शे तिस्य वा मृतिवासरे॥ पार्वणं त्वितरेषां तु घेको
द्दिष्टं तु वा भवेत्॥३॥ स्कांदे॥ चतुर्थेनाश्रमं गच्छेद्ब्रह्मविद्यापरायणः॥ एकदंडी त्रिदंडी वा सर्वसं
गविवर्जितः॥१॥ एकादशेह्नि संप्राप्ते यदा तु द्वादशेहनि॥ पार्वणेन विधानेन श्राद्धं कुर्यात्तदौर
सः॥२॥ नारायणबलिं कृत्वा पार्वणश्राद्धमाचरेत्॥ प्रत्यब्दे दार्शिके श्राद्धे तीर्थेपि महालये॥३॥
संबंधनामगोत्रेण श्राद्धकालेषु नित्यशः॥ अन्यत्रापि॥ संबंधनामगोत्रैश्च पार्वणं द्वादशेहनि॥
त्र. ततः माज्ञातयः कुर्युरेकादशदिने पि वा॥१॥ अथवात्मांतरात्मेति परमात्मेत्युदाहृतः॥ तच्छ्राद्धे ४७

साधुरूरवो विश्वेदेवाः प्रकीर्तिता बुधैः॥२॥ इति पुत्रादिज्ञातिकर्तृकपार्वणश्राद्धे संबंधनामगोत्रैर्ह
द्धेरवः॥ शिष्यादिकर्तृकतत्पार्वणश्राद्धे तु॥ आत्मांतरात्मापरमात्मेत्युद्धेरवः॥ साधुरूरूसंज्ञकावि
श्वेदेवाः॥ नपुरूरवाईवसंज्ञकाविश्वेदेवाः॥ एतत्पक्षे यज्ञोपवीततमा॥ यवाश्चतिलार्थे॥ संकल्पा
४८वि दिपिंडदानांतमग्नौकरणवर्जं दैवश्राद्धवत् कृतमिति विशेषः॥ यमः॥ एकादशेह्नि कर्तव्यो नारायण
बलिस्ततः॥ पाकांतरेण तत्रैव पार्वणं श्राद्धमाचरेत्॥१॥ बौधायनशौनकौ॥ अहन्येकादशे प्राप्ते पा
र्वणं तु विधीयते॥ नारायणबलिश्राद्धस्य कर्तव्यो द्वादशेहनि॥१॥ अत्र नारायणबलिश्राद्धयोरेकदि
नानुष्ठानपक्षे एकादशे द्वादशे वा अग्नीति कालविकल्पः॥ नारायणबलिं पाकांतरेण॥ नारायणबलिं
कृत्वा पार्वणश्राद्धाचरणं कृत्वेत्यादिस्कांदात्॥ पाकांतरेणेति यमवाक्यात्कालभेदाच्च॥ शिष्यादिकर्तृ
कतत्पार्वणश्राद्धस्यदैवत्वेनतेनैककालत्वादेकपाकेन पाकांतरे वा एकतंत्रेणानुष्ठानमिति वि
पाकांतरेण॥ नारायणबलिं२

४८ शेषः॥ दिनभेदेन तयोः करणपक्षे तु एकादशे पार्वणं द्वादशे नारायणबलिः॥ तद्दिन एव एकपाके
न पाकांतरेण वाऽराधनमसंभवे त्रयोदशे वेति भेदः॥ ततः प्रतिमासं मृततिथावाराधनमेव वत्स
रांतं मृततिथावपि॥ तथा च संग्रहे॥ यतौ मृते तु वपनं पार्वणं विष्णुपूजनं॥ प्रत्यब्दं प्रतिमासं च
कुर्यादाराधनं बुध इति॥ १॥ अस्यार्थः॥ यतौ मृते तु वपनमेव किं तत्संस्कारः पुत्रादिभिः कार्यः॥
तत एकादशे द्वादशे वेति विहितकाले पार्वणश्राद्धं॥ तथैव विहितकाले विष्णुपूजनं नारायण
बलिः॥ ततः प्रतिमासं प्रत्यब्दं च कारान्मरणोत्तरद्वादशे चाराधनमिति॥ द्वादशाहे मृतादेच
त्वाराधनमथाचरेदिति नागरखंडात्॥ समानन्यायाद्दत्नादिकालेष्वाराधनमिति केचित्॥
तत्र प्रतिमासमाराधनमेव न पार्वणं॥ मासिकं नैवेति वाक्यांतरेण तस्य निषेधात्॥ प्रत्यब्दं तु
पार्वणोत्तरं तद्दिन एव पाकांतरेणाराधनं॥ प्रत्यब्द इति पूर्वोदाहृतस्कांदवाक्येन तत्र पार्वण। ४८

कृ १

तु विधानात्॥ तच्च प्रत्यब्दं पार्वणं पुत्रादीनामेव॥ तन्नियामकं तु मंत्रवाक्ये स्मृतत्वप्रदर्शनात्॥ शिष्यादीनां
तु आराधनमेव॥ अपुत्रयतिविषये तु प्रत्यब्दं शिष्यादेरप्युक्तदेवश्राद्धप्रकारेण पार्वणमपि भव
तीति केचित्॥ तत्रैकादशे क्षिप्र पूर्वसंबंधनामगोत्रोल्लेखनेन पित्रादिमुद्देशकं प्रसिद्धपार्वणध
र्मकं श्राद्धं कार्यं॥ शिष्यादिश्रवणं तेन ब्रह्मीभूतस्य गुरोर्मृततदिनादारभ्यैकादशेह्नि पितुः संबं
धनामगोत्रोल्लेखेन करिष्यमाणसर्वश्राद्धोद्देश्यतासिध्यर्थं पार्वणश्राद्धं करिष्य इति विशेषः सं
कल्पे॥ सर्वस्यान्वयदीनानामिति यमवचनं संबंधनामगोत्रैश्चेति स्मृत्यंतरवचनं चेह शके संस्येमल्लं
॥ इतरदविकृतं प्रत्यब्दवत्॥ एवं कृते नैव चतिलतर्पणेन तदंगस्यापि सिद्धिः॥ न परेद्युः॥ प्रत्यब्द
वद्विधायकवचनाभावात्॥ द्वादशेह्नि नारायणबलिः॥ तत्प्रकारमाह बौधायनः॥ नारायणबलि
५ श्चास्य कर्तव्यो द्वादशेह्नि॥ कृत्वा विष्णोर्महापूजां पायसं च निवेदयेत्॥ १॥ अग्नौ कृत्वा तु तच्छेषं

४९ व्याहृतिभिः समाहितः ॥ यतीनुद्दिश्य तस्मात्पूजयित्वा निमंत्र्य द्वादशावरान् ॥ २ ॥ अभ्यर्च्य गंधपुष्पा
द्यैर्मंत्रैर्द्वादशनामभिः ॥ संभोज्य तद्यथाकालेन दक्षिणां च निवेदयेत् ॥ ३ ॥ त्रयोदशं द्विजश्रेष्ठमात्म
संस्थं जितेंद्रियं ॥ विष्णुं यथा तथाभ्यर्च्य पाद्यार्घ्यैश्च विधानतः ॥ ४ ॥ दद्यात्पुरुषसूक्तेन पुष्पवस्त्रादि
कं क्रमात् ॥ वस्त्रालंकरणादीनि यथाशक्ति प्रदापयेत् ॥ ५ ॥ उच्छिष्टसंनिधौ तस्य दर्भानास्तीर्य चि
तले ॥ भूर्भुवः स्वः स्वधायुक्तैस्तस्मै दद्याद्बलित्रयं ॥ ६ ॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च ॥ य
त्फलं तत्फलेनैव यः करोति क्रियामिति ॥ ७ ॥ शौनकस्तु ॥ शौनकोऽहं प्रवक्ष्यामि नारायणबलिं
परं ॥ चांडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि ॥ दंष्ट्रिभ्यश्च पशुभ्यश्च रज्जुशस्त्रविषादिभिः ॥
देशांतरमृतानां च मृतानां चान्यसाधनैः ॥ २ ॥ जीवच्छ्राद्धमृतानां च कनिष्ठानां तथैव च ॥ यतीनां
योगिनां पुंसामन्येषां मोक्षकांक्षिणां ॥ ३ ॥ पुण्यपापक्षयार्थाय द्वादशेह्नि कारयेत् ॥ द्वादशांत्र ४९

वर्णेऽह्नि ते पंचम्यां पर्वणोस्तु वा ॥ ४ ॥ इत्युक्त्वा विष्णुपूजादि व्याहृतिहोमांते ऽतो देवेति पंक्तिः पुरु
दि२ षसूक्तेन च एतस्य चं पाय संकुत्वा केशवा द्वादशनामभिस्तर्पयित्वा द्वादशविप्रान्संभोज्य तैरेव द्वा
दशपिंडान्दद्यादित्यधिकं बौ धायनकल्पाद् ॥ द्वादशाहकालासंभवे द्वादश्यादयः प
ञ्चैण कालाः ॥ तेषु पिपूर्वः श्रेयान् ॥ तत्र द्वादशी श्रवणपंचम्यः शुक्लपक्षस्याः ॥ पर्वणोरपि पौ
र्णमासी पूर्वा ॥ असंभवे त्वमेति विशेषः ॥ यमः ॥ दंसे मृते स्तुतः कुर्यात्पार्वणं पितृयज्ञवत् ॥ नाराय
बलिं चैव तथापरमदैवसके ॥ विष्णुं संपूज्य विधिवद्दत्वार्घं बलिमुत्तमं ॥ १ ॥ चरुं कृत्वा तु सूक्तेन पौरु
षेण तु षोडशी ॥ केशवाद्यैर्नामभिस्तु नामभिर्जुहुयात्तथा ॥ २ ॥ द्वादशब्राह्मण भोज्या विष्णु वैति तु
त्रयोदशः ॥ पूर्वपक्षे केशवाद्याः कृष्णे संकर्षणादयः ॥ ३ ॥ एवं कृते विधानेन नारायणबलौ द्विज ॥ वि
ष्णुलोकमवाप्नोति पुरुषो नात्र संशयः ॥ ४ ॥ इति ॥ ॥ अथ द्वादशाहन्येवाराधनं ॥ तत्रासंभवे

५० शुक्ले द्वादशं कार्यं॥ द्वादश्यामथवेति वक्ष्यमाणनागरखंडवचनात्॥ तत्रासंभवे त्रयोदशे क्रिया॥ वा
चारात्॥ तत्प्रकारो नागरखंडे॥ द्वादशाहे मृतादेव चाराधनमथाचरेत्॥ श्रीमद्गुरुं तद्गुरुं च परमे
ष्ठीगुरुं तथा॥१॥ परात्परगुरुं चैव केशवादींस्तु नामभिः॥ गुर्वर्थे चतुरो विप्रान्केशवादींस्तु शक्ति
तः॥२॥ संपूज्य भोजयेदन्नैः सघृतव्यंजनादिभिः॥ द्वादश्यामथवा शुक्ले सम्यगाराधनं चरेदिति॥ शु॥
मृतादेति चकारात् षोडशश्राद्धकालेषु॥ प्रसत्स्वप्रतिमासं चेति हेमाद्रिधृतवचनात्॥ गुर्वर्थे चतु
र इति॥ गुरुपदघटितनामधेयार्थे प्रतिनामधेयं चतुर इति॥ प्रतिनामधेयमेकैक इति चतुर्णा
मर्थे चतुर इति वा॥ आद्यपक्षे गुर्वादिचतुष्टयार्थे षोडश द्वितीये चत्वार इति भेदः॥ गुरुत्रयांते
परात्परगुरुं विद्याद्यस्मादौ विश्वरूपधराचार्यं॥ ततो गुर्वादित्रयं॥ ततः केशवादीत्येवं प्रका
रो ग्रंथांतरे॥ विश्वरूपधराचार्यं गुर्वादित्रयमेव च॥ केशवादींस्ततः शुक्ले लक्ष्मेसं ५०

कर्षणादिकानिति॥२॥ ॥कन्याभार्या यदि स्त्रीकर्तृकयतिसंस्कारे तु विप्रद्वारा वैदिकमंत्रकः॥ स्वक
र्तृको वा पौराणनाम्नान्यतरमंत्रकः प्रयोगऊह्यः॥ सन्निकृष्टे यतेः पुत्रो यदि स्वपितृनाशनं॥ कृ
त्वा तु वपनं स्नात्वा शुद्धात्मा यतिसत्क्रियामिति पितृमेधपद्धतिस्थस्मृतिवाक्ये पुत्रपदस्याधिका
रिमात्रपरत्वात्॥ अधिकारसंपादकं कृच्छ्राचरणं वपनं च विधवायाः॥ सधवायाः परं कृच्छ्राचर
णमेवेति विशेषः॥ असंनिकृष्टपुत्रादिविषये विशेषः पितृमेधपद्धतौ॥ असंनिकृष्टश्चेत्पुत्रः
सिद्धिवार्तां पितुस्तदा॥ अक्लेति विशेषः॥ स्नात्वा वपनपूर्वं च शुक्लैकादश्यां तु तदंतरा॥ दशम्यामेव कु
र्यात्तु नारायणबलिं सुत इति॥२॥ अस्यार्थः॥ देशांतरगतः पुत्रो बली भूत्वा तस्य पितुः सिद्धिवार्तां श्रु
त्वा वपनपूर्वकं स्नात्वाचारप्राप्तपूजनादि दशाहांतमविकृतं लक्त्वा एकादशाद्यपार्वणादि संनिकृ
व ष्टवद्विकृतं कुर्यात्॥ इदं च लक्ष्मपक्षे मतिश्रवणे॥ शुक्लपक्षे तु श्रवणे वपनस्नानभोजनाद्यवि

५१ कृतं॥ तत्र द्वितीयदिनमारभ्य नारायणबलिकालादर्वाग्यदि स्पृष्टं दशाह्यापातस्तदा तत्रैव नारायण
बलिं कृत्वा एकादशे क्षिप्रापार्वणं द्वादशे दन्याराधनमिति॥ इदं च पुत्रस्यैव॥ न भ्रात्रादेः॥ तद्वाक्ये पु
नः सुतग्रहणात्॥ मुख्याधिकारित्वेतस्यापि भवति॥ पुत्रपदस्याधिकारिमात्रोपलक्षकत्वादि
ति सुधीभिरूह्यं॥ एवं कुर्वतः फलं सर्वमेवोक्तमश्वमेधसहस्रस्यादिना॥ तथा॥ नाशौचं नच से
शोकस्य गोत्रिणां तु यतौ मृते॥ गर्तदेहादिकं कार्यं पुरुषार्थमनीषिभिः॥१॥ द्वादशाहमन
ध्यायः शिष्यः कुर्यात्समाहितः॥ खननं वहनं स्पर्शं संस्कुर्वन् शुद्धिमृच्छति॥२॥ असंस्कृतं वि
शीर्येत यस्मिन्देशे कलेवरं॥ धर्मलोपो भवेत्तत्र दुर्भिक्षं मरणं ध्रुवं॥३॥ दिवंगते गुरौ शिष्यै
स्तदा कार्यमुपोषणं॥ स्नात्वा सचैलं यतिभिर्यतिधर्मः सनातनः॥४॥ न स्नानमाचरेद्भिक्षुः
पुत्रादिनिधने श्रुते॥ पितृमातृक्षयं श्रुत्वा स्नात्वा शुध्यति सांबरः इति॥५॥ इति ब्रह्मानंदिप्र * ५१

कारेण यतिसंस्कारोपयोगिनिर्णयः समाप्तः॥ ॥इति प्रतिष्ठानपुरवासी तोरो नारायणात्मज
रुद्रदेवकृते प्रतापनारसिंहाख्ये संन्यासप्रयोगः समाप्तः॥ संवत् १८६४ शके १७२९ पौषवदि
११ शनौ अश्वनीकुमारसंनिधौ माधवानंदसरस्वत्या लिखितमिदं पुस्तकं॥ ॥श्री॥॥

अथसंन्यासग्रहणसामग्री॥		गुलालपै·१	कलश२	ब्राह्मणभोजनं३०
आदौसंन्यासिनांसमाराधनं		अबीलपै·१	त्रभाली२	यज्ञोपवीत२
प्रायश्चित्तं	गोलसे·।	कर्पूरपै·१	गोमय	दंडः१
रेवासूत्रपैसा१	दुग्धसे·१	धूपसरापै·२	गोमूत्र	जलपवित्रं१
नारीकेर५	दधिसे·१	पुष्पाणि	अक्षता	शिक्यं१
सोपारीसेर२	यवसे·॥	हार२	हिरण्य	पात्रं१
तांबूल५०	तलपै·॥	दूर्वा	घृतपात्रं	कमंडलुः१
	आमपले	आम्रपत्र	मधुपर्क	
बदरीफल४९	बवसे·५	दर्भ	कांस्यपात्रं	आसनं१
शालपैसा१	चोखासे·२	पत्र	आचार्याय	कौपीने२
खारेकपै४	गोधूमसे·॥	पत्रावली	धेनुः	आच्छादनं१
खाउपैसा१	जाजासे·।	दरीया	वस्त्राणि	कंथा१
मधपैसा१	कुंकुमपै·१	समिधः१०	पूर्वोदितभागं	पादुके२
घृतसेर३	सुकरसे·।	शूर्प१	पूरसीदक्षणा	

आध्यानं दस्वेदं

प्रच्छाकं